भगवद्गीताविश्वरूप

।।प्रारम्भः।।

1

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भगवद्गी०
अ०विश्व०
रूप०

॥१॥

श्रीगणेशायनमः ॥ अर्जुनउवाच ॥ मदनुग्रहायपरमंगुह्यमध्यात्म
संज्ञितम् ॥ यत्त्वयोक्तंवचस्तेनमोहोऽयंविगतोमम ॥ १ ॥ भवाप्ययौहि
भूतानांश्रुतौविस्तरशोमया ॥ त्वत्तःकमलपत्राक्षमाहात्म्यमपिचा
व्ययम् ॥ २ ॥ एवमेतद्यथात्थत्वमात्मानंपरमेश्वर ॥ द्रष्टुमिच्छामि
तेरूपमैश्वरंपुरुषोत्तम ॥ ३ ॥ मन्यसेयदितच्छक्यंमयाद्रष्टुमितिप्रभो
॥ योगेश्वरततोमेत्वंदर्शयात्मानमव्ययम् ॥ ४ ॥ श्रीभगवानुवाच
पश्यमेपार्थरूपाणिशतशोऽथसहस्रशः ॥ नानाविधानिदिव्यानिना
नावर्णाकृतीनिच ॥ ५ ॥ पश्यादित्यान्वसून्रुद्रानश्विनौमरुत
स्तथा ॥ बहून्यदृष्टपूर्वाणिपश्याश्चर्याणिभारत ॥ ६ ॥ इहैकस्थंजग
त्कृत्स्नंपश्याद्यसचराचरम् ॥ ममदेहेगुडाकेशयच्चान्यद्द्रष्टुमिच्छसि
॥ ७ ॥ नतुमांशक्यसेद्रष्टुमनेनैवस्वचक्षुषा ॥ दिव्यंददामितेचक्षुःप

॥१॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भगवद्गी
ता विश्व
रूपस

न्॥१५॥अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपम्॥नान्तं न मध्यं
न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूपम्॥१६॥किरीटिनं गदिनं चक्रि
णं च तेजोराशिं सर्वतो दीप्तिमन्तम्॥ पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्दीप्ता
नलार्कद्युतिमप्रमेयम्॥१७॥त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं नि
धानम्॥त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे॥१८॥
॥२॥ 2 अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रं॥ पश्यामि त्वां दीप्त
हुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम्॥१९॥द्यावापृथिव्योरिदम ॥२॥
न्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः॥ दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोक
त्रयं प्रव्यथितं महात्मन्॥२०॥अमी हि त्वां सुरसंघा विशन्ति केचिद्भीताः
प्राञ्जलयो गृणन्ति॥ स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवन्ति त्वां स्तु
तिभिः पुष्कलाभिः॥२१॥रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्य मे योगमैश्वरम्॥८॥ संजय उवाच॥ एवमुक्त्वा ततो राजन्महायोगेश्व
रो हरिः॥ दर्शयामास पार्थाय परमं रूपमैश्वरम्॥९॥ अनेकवक्त्रनयनम
नेकाद्भुतदर्शनम्॥ अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम्॥१०॥
दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनम्॥ सर्वाश्चर्यमयं देवमनंतं वि
श्वतोमुखम्॥११॥ दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता॥ यदि भाः सद
शी सा स्याद्भासस्तस्य महात्मनः॥१२॥ तत्रैकस्थं जगत्कृत्स्नं प्रविभक्त
मनेकधा॥ अपश्यद्देवदेवस्य शरीरे पांडवस्तदा॥१३॥ ततः स विस्मयावि
ष्टो हृष्टरोमा धनंजयः॥ प्रणम्य शिरसा देवं कृतांजलिरभाषत॥१४॥
अर्जुन उवाच॥ पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसं
घान्॥ ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

॥३॥ त्तमांगैः ॥२७॥ यथा नदीनां बहवोंऽबुवेगाः समुद्रमेवाभिमुखा द्रवन्ति । तथा
तवामी नरलोकवीराः विशंति वक्त्राण्यभिविज्वलन्ति ॥२८॥ यथा प्रदीप्तं
ज्वलनं पतंगा विशंति नाशाय समृद्धवेगाः ॥ तथैव नाशाय विशन्ति लो
कास्तवापि वक्त्राणि समृद्धवेगाः ॥२९॥ लेलिह्यसे ग्रसमानः समंता
ल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ॥ तेजोभिरापूर्य्य जगत्समग्रं भा
सस्तवोग्राः प्रतपन्ति विष्णो ॥३०॥ आख्याहि मे को भवानुग्ररूपो नमो
स्तु ते देववर प्रसीद ॥ विज्ञातुमिच्छामि भवन्तमाद्यं नहि प्रजानामि तव ॥३॥
प्रवृत्तिम् ॥३१॥ श्रीभगवानुवाच ॥ कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लो
कान्समाहर्तुमिह प्रवृत्तः ॥ ऋतेऽपि त्वां न भविष्यन्ति सर्वे येऽवस्थिताः
प्रत्यनीकेषु योधाः ॥३२॥ तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्
भुंक्ष्व राज्यं समृद्धम् ॥ मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मरुतश्चोष्मपाश्च ॥ गंधर्वयक्षासुरसिद्धसंघा वीक्षंते त्वां विस्मिता
श्चैव सर्वे ॥ २२ ॥ रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम् ॥ बहू
दरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥ २३ ॥ नभःस्पृ
शं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं ॥ दृष्ट्वा हि त्वां प्रव्यथिता
न्तरात्मा धृतिं न विंदामि शमं च विष्णो ॥ २४ ॥ दंष्ट्राकरालानि च ते मु
खानि दृष्ट्वैव कालानलसन्निभानि ॥ दिशो न जाने न लभे च शर्म प्र
सीद देवेश जगन्निवास ॥ २५ ॥ अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे
सहैवावनिपालसंघैः ॥ भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदी
यैरपि योधमुख्यैः ॥ २६ ॥ वक्त्राणि ते त्वरमाणा विशंति दंष्ट्राकराला
नि भयानकानि ॥ केचिद्विलग्ना दशनांतरेषु संदृश्यंते चूर्णितै

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ष्ठतस्ते नमोस्तु ते सर्वत एव सर्व ॥ अनन्तवीर्यामितविक्रमस्त्वं सर्वं स
माप्नोषि ततोसि सर्वः ॥ ४० ॥ सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे
सखेति ॥ अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि ॥ ४१
यच्चावहासार्थमसत्कृतोसि विहारशय्यासनभोजनेषु ॥ एकोऽथवा
 प्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम् ॥ ४२ ॥ पितासि लोकस्य
 चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ॥ न त्वत्समोस्त्यभ्यधिकः
कुतोन्यो लोकत्रयेप्यप्रतिमप्रभाव ॥ ४३ ॥ तस्मात्प्रणम्य प्रणिधाय
कायं प्रसादये त्वामहमीशमीड्यम् ॥ पितेव पुत्रस्य सखेव सख्युः प्रि
यः प्रियायार्हसि देव सोढुम् ॥ ४४ ॥ अदृष्टपूर्वं हृषितोस्मि दृष्ट्वा भयेन
च प्रव्यथितं मनो मे ॥ तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवा
स ॥ ४५ ॥ किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

साचिन् द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान् मया हतां
स्त्वं जहि मा व्यथिष्ठाः युध्यस्व जेतासि रणे सपत्नान् ३४ संजय उवाच
एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी नमस्कृत्वा भूय ए
वाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ३५ अर्जुन उवाच ॥ स्थाने हृषी
केश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च । रक्षांसि भीतानि दिशो द्रवं
ति सर्वे नमस्यन्ति च सिद्धसंघाः ३६ कस्माच्च ते न नमेरन् महात्मन्
गरीयसे ब्रह्मणोऽप्यादिकर्त्रे अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्त
त्परं यत् ३७ त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम्
वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप ३८ वायुर्यमो
ऽग्निर्वरुणः शशांकः प्रजापतिस्त्वं प्रपितामहश्च नमो नमस्तेऽ
स्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ३९ नमः पुरस्तादथ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

देर्न तपसा न दानेन न चेज्यया ॥ शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा
॥५३॥ भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ॥ ज्ञातुं द्रष्टुं च तत्त्वेन प्र
वेष्टुं च परंतप ॥५४॥ मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः ॥ निर्वैरः
५॥ सर्वभूतेषु यः स मामेति पाण्डव ॥५५॥ इति श्री भगवद्गीता सूप ॥५
निषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विश्व
रूपदर्शनो नाम एकादशोऽध्यायः ११ श्रीकृष्ण श्रीकृष्ण

5

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥४६॥ श्रीभगवानुवाच ॥
मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् तेजोमयं विश्वम
नन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम् ४७ न वेदयज्ञाध्ययनैर्न दानैर्न
च क्रियाभिर्न तपोभिरुग्रैः एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन
कुरुप्रवीर ४८ मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदम्
व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥४९॥ संजयउ
वाच ॥ इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः आश्वा
सयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ५० अर्जुन उ
वाच ॥ दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन इदानीमस्मि संवृत्तः स
चेताः प्रकृतिं गतः ५१ श्रीभगवानुवाच सुदुर्दर्शमिदं रूपं दृष्टवान
सि यन्मम देवा अप्यस्य रूपस्य नित्यं दर्शनकांक्षिणः ५२ नाहं वे
श्रीराम श्रीराम श्रीराम श्रीराम राम राम राम रामरामराम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham